International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 25-27
© 2020 IJSR
www.anantaajournal.com
Received: 18-11-2019
Accepted: 22-12-2019

सुब्रह्मण्यकेशवभट्ट
व्याकरणाध्यापकः
राष्ट्रियसंस्कृतसंस्थानम्,
गुरुवायूर् परिसर, पूरनट्टुकरा,
केरल, भारत ।

Corresponding Author:
सुब्रह्मण्यकेशवभट्ट
व्याकरणाध्यापकः
राष्ट्रियसंस्कृतसंस्थानम्,
गुरुवायूर् परिसर, पूरनट्टुकरा,
केरल, भारत ।

# शाब्दनये अरुणाधिकरणस्य उपयोगिता

सुब्रह्मण्यकेशवभट्टः

**प्रस्तावना**

सर्वेष्वपि शास्त्रेषु शास्त्रान्तरीयविषयाणां पूर्वपक्षत्वेन सिद्धान्तोपोद्बलकत्वेन वा उपयोगः क्रियते एव। "कणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमिति" च श्रूयते। न केवलं व्याकरणशास्त्रस्थविषयाः न्यायशास्त्रस्थविषयाः वा अन्येषामुपकारकाः अपि तु पूर्वोत्तरमीमांसकसमयाः अपि बहूपकारकाः एव। प्रकृते व्याकरणशास्त्रीयार्थिकग्रन्थेषु मीमांसकशास्त्रस्थारुणाधिकरणमिति विषयः चिन्त्यते।

ज्योतिष्टोमप्रकरणे वाक्यं श्रूयते – "अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति" इति। एकं हायनं यस्याः सा एकहायनी गौः। वयोवाची एकहायनीशब्दः। पिङ्गे अक्षिणी यस्याः सा पिङ्गाक्षी गौः। अनयोः द्वयोरपि पदयोः द्रव्यवाचकत्वम्। द्रव्यस्य च क्रियायामन्वयः इत्यतः अनयोः क्रीणातौ अन्वयः सिध्यति। तथा च एकहायन्या क्रीणाति, पिङ्गाक्ष्या क्रीणाति इति अन्वयः लभ्यते। अरुणया इति गुणवाचकः शब्दः। आरुण्यरूपं गुणं बोधयति इति कृत्वा अरुणाशब्दः गुणवाची। तस्य च द्रव्याश्रितत्वात् द्रव्यमन्तरा क्रियया सह अन्वयः न सम्भवति इति कृत्वा आरुण्यस्य क्रयणभावनायामन्वयः दुर्घटः। अतः अत्र सन्देहो भवति किं वाक्यादरुणापदं विच्छिद्य प्राकरणिकेषु अजादिद्रव्येषु अन्वयः क्रियते? उत अरुणाशब्दः एकहायनशब्दे सम्बध्य क्रीणातिना अन्वयं प्राप्नोति इति। अत्र च अरुणया इति तृतीया श्रुत्या क्रयणभावनां प्रति करणत्वं लभ्यते। तथा च अरुणा शब्दस्य क्रयणभावनायामेव अन्वयः वक्तव्यः कारकाणां क्रियायामेवान्वयः इति नियमात्। परन्तु अरुणाशब्देन उपस्थाप्यमानस्य गुणस्य अमूर्तत्वात् क्रयणभावनायामन्वयः न कर्तुं शक्यः इत्यतः तस्य प्राकरणिकेषु अजादिद्रव्येषु एव अन्वयः वक्तव्यः स्यात्।

अत्र ज्योतिष्टोमवाक्ये श्रूयमाणयोः एकहायनी पिङ्गाक्षी पदयोः द्रव्य

वाचित्वमस्तीत्यतः तत्र अरुणापदस्य अन्वयः क्रियतामित्यप्याक्षेप्तुं न शक्यते। यतः एकहायनी पिङ्गाक्षी पदयोः नात्र द्रवयवाचकत्वमपि तु सम्बन्धमात्रवाचकत्वम्, यतः पिङ्गे अक्षिणी यस्याः इति विग्रहे षष्ठ्याः एव प्राधान्यात् षष्ठ्या च सम्बन्धमात्रस्य बोधदर्शनात् प्रकृते द्रव्यवाचित्वमनयोः न सम्भवति। अतः अरुणापदस्य एकहायन्यदिषु अन्वयः दुर्लभः एव इति प्राप्तम्।

तत्रायं सिद्धान्तः – अरुणापदस्य गुणवाचकस्य स्ववाक्योपात्तद्रव्यद्वारा एव क्रयणभावनायामन्वयः, तत्रापि सन्निहितत्वादेकहयनी शब्देन सहैव अन्वयः, एकहायनी शब्दाच्च गौः एव लभ्यते क्रमप्राप्तत्वात्, ’गवा ते क्रीणानि’ इति मन्त्रलिङ्गात् इति। अत्रिदानीम् एकहायनी पिङ्गाक्षी पदयोः द्रव्यबोधकत्वाभावे आरुण्यस्य तत्रान्वयः दुश्शकः एव। अतः तयोः द्रव्यवाचकत्वमस्तीत्येव सिद्धवत्कृत्य सिद्धान्तः उपस्थापितः। यद्येवं न स्यात् तर्हि सिद्धान्तभङ्गः स्यादेव। अतः तत्रायं सिद्धान्तः आश्रितः मीमांसावार्तिककारैः-

सर्वत्र यौगिकैः शब्दैः द्रव्यमेवाभिधीयते।
न हि सम्बन्धवाचित्वं सम्भवत्यति गौरवात्॥ इति।

तथा च एकहायन्यादि यौगिकैः शब्दैः द्रव्यमेवाभिधीयते इत्यतः प्रकृते एकहायनीशब्दस्यापि द्रव्यवाचकत्वात् अरुण्यस्य गुणस्य द्रव्यान्वयः सुलभः। तथा च अरुणापदं गुणवाचकं एकहायनीशब्दस्य विशेषणं सत् अर्थमुपस्थापयति। आरुण्यविशिष्टैकहायनीगौः इति तस्यार्थः लभ्यते। एवं च अरुणापदस्य अन्वयविषयकः संशयः निरस्तः॥

अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात् (३-१-१२)। यस्मिन् वाक्ये द्रव्यगुणयोः एकप्रयोजनकत्वं, तत्र एकक्रियासाध्यत्वात् द्रव्यगुणयोः परस्परमन्वयः इति नियमः इत्यर्थः सूत्रस्य। “अरुणया पिङ्गाक्ष्या एकहायन्या गवा सोमं क्रीणाति” इत्यस्मिन् वाक्ये अरुणा पदं यथा गुणिनं तथा गुणमपि ब्रवीति इति सत्यम्। किन्तु क्रीणाति इति धात्वर्थस्य एकत्वात् एकार्थप्रतिपादकत्वं तावत् आश्रयणीयम्। पदानि संहत्य एकार्थप्रतिपादकानि भवन्ति इति न्यायः। तेन एकहायन्याः पिङ्गक्ष्याः यथा अन्वयः तथा अरुणापदोत्तरस्य करणकारकस्यापि अन्वयः कर्तव्यः। एकहायनी-पिङ्गाक्षीपदयोः द्रव्यवाचकत्वेन क्रीणातिना सहान्वये किमपि बाधकं नास्ति। अरुणया इत्यत्र स्त्रीप्रत्ययेन स्त्रीत्वं तच्च प्राणिद्रव्यकमिति बोधे जाते प्रकृत्या तावत् लक्षणया तद्विशिष्टं द्रव्यं गम्यते। द्रव्यं गम्यमानमपि द्रव्यांशस्य लाक्षणिकत्वादुपेक्ष्य श्रुतिप्रतिपाद्यं गुणमेव तृतीयाक्रयं प्रति करणतया अभिधत्ते। अथवा अरुणाशब्दः द्रव्यमनादृत्य गुणवाचक एव सन् अन्वेति। मुख्ये सम्भवति लक्षणाश्रयणस्यायुक्तत्वात्। यद्यपि स्त्रीप्रत्ययसत्वात् गुणवचनः अरुणाशब्दः न भवितुमर्हति, तथापि परिच्छेद्यैकहायनीद्वारा लिङ्गान्वयोपपत्तेः। एवं च अरुणाशब्दस्य स्त्रीप्रत्ययान्तस्याऽपि केवलगुणवचनत्वमनुपपन्नम्। आरुण्यस्य द्रव्यपरिच्छेदकत्वशक्तिम् आलोच्य परिच्छेद्यां स्ववाक्योपात्तामेकहायनीं परिच्छिद्य तद्वारा क्रियासधनत्वेन अन्वेति। परिच्छेदो नाम इतरव्यावृत्ततया द्रव्यस्य प्रतीतिविशेषः। तथा चारुणागुणपरिच्छिन्न-एकहायनीकरण-क्रयभावना इति प्रकृतवाक्यस्यार्थः पर्यवस्यति। एवं च प्रकृतवाक्यगतैकहायनीद्रव्यपरिच्छेदकतया क्रयभावनायामन्वये सम्भवति वाक्याद्विच्छिद्य प्राकरिणिकान्यद्रव्यपरिच्छेदकत्वमारुण्यस्य इति वर्णनम् अयुक्तम् इति सिध्यति।

अत्रेदानीं वैयाकरणसमय उपस्थाप्यते। वैयाकरणानामस्माकं धात्वर्थनिरूपणं कृतं “फलव्यापारयोः धातुराश्रये तु तिङः स्मृताः” इत्यादिभिः कारिकाभिः। भूषणसारे तेषां विवरणं च कृतम्। तत्र धातुः फलव्यापारयोः बोधकः फलव्यापारयोराश्रयः कर्तृकर्म च तिङर्थः इति वैयाकरणसमयः। मीमांसकास्तु तिङर्थः भावना (व्यापारः) इति वदन्ति। तत्र मीमांसकानां पक्षमुपक्षेप्तुं वैयाकरणानां मतोपस्थापनं करोति ग्रन्थकारः। “देवदत्तः पचति” इत्यस्मिन् स्थले

देवदत्ताभिन्नैकर्तृकविक्लृत्यनुकूलो व्यापारः इति बोधो भवति। अत्र पचति इत्यस्य विवरणं पाकं करोति इति भवति। "पच्" धातोः विक्लृत्यनुकूलव्यापारः अर्थः तिप् प्रत्ययस्य कर्ता अर्थः। तथा च देवदत्तेन समं पचति इत्येतदभेदेन सम्बध्यते। अत्र मीमांसकाः तावत् तिङा भावना उच्यते, धातुना फलमुच्यते इति वदन्ति। यदि तु मीमांसकोक्तरीत्या पचति इत्यत्र तिङा भावना एव उच्यते इति अङ्गीक्रियेत, तर्हि देवदत्तः पचति इत्यत्र देवदत्त-पचत्योः अभेदान्वयः न सिद्ध्यति इति दोषः। अतः यथा पक्ता देवदत्तः इत्यत्र कर्तुः अभेदेन अन्वयः तथैव पचति देवदत्तः इत्यादावपि अपेक्षितः अभेदान्वयः।

ननु अभेदबोधं प्रति समानविभक्तिकत्वं तन्त्रम्, पक्ता देवदत्तः इत्यत्र समानविभक्तेः सत्वादभेदबोधेऽपि 'देवदत्तः पचति' इत्यत्र तु न तथा समानविभक्तिकत्वमिति वाच्यम्। समानविभक्तिकस्यैव अभेदबोधे हेतुत्वे सति सोमेन यजेत, स्तोकं पचति, राजपुरुषः इत्यादावपि अभेदबोधो न स्यात्। अतः अभेदबोधं प्रति किं नियामकमिति चेदुच्यते विरुद्धविभक्तिराहित्यमेव इति। अतः देवदत्तः पचति इत्यादौ तिङ् विभक्तेः सत्वेऽपि प्रथमाविभक्तेः विरुद्धविभक्तयः द्वितीयाद्याः न सन्तीत्यतः तत्र अभेदबोधे न किञ्चिद्बाधकम्। अतः देवदत्ताभिनैककतृकः विक्लृत्यनुकूलो व्यापारः इति बोधो भविष्यति। अत्र च पक्ता देवदत्त इत्यपेक्षया विशेषणविशेष्यभावभेदेऽपि न कापि क्षतिः। एवञ्च तिङां कर्तृवाचकत्वे न कश्चिद्दोषः इति सिद्धम्।

ननु देवदत्तः पचति इत्यादौ अभेदबोधार्थं न तावत्तिङां कर्तृवाचकत्वं वक्तव्यं, तत्र तिङा भावनालाभेऽपि लक्षणया कर्तुः लाभात् अभेदान्वयः सम्भवतीति वाच्यम्। तथा सति भवतामेव अरुणाधिकरणस्थसिद्धान्तभङ्गापत्तिः। यतः पूर्वोक्तदिशा तत्र अरुणाधिकरणे अरुणापदस्य गुणवाचकत्वात् कथं क्रयणभावनायामन्वयः वक्तव्यः इत्याशङ्कायां द्रव्येण स्ववाक्योपात्तेन एकहायनीत्यनेन अन्वयः दर्शितः भवद्भिः। यदि लक्षणया अन्वयः कर्तुं शक्यः स्यात्तर्हि तत्रापि लक्षणया एव अरुणापदस्य द्रव्यबोधकत्वमाश्रित्य क्रयणक्रियायामन्वयः सुलभः स्यात्। तथा च यद्यत्र लक्षणाश्रयणमिति मन्यन्ते भवन्तः तर्हि भवतामेव वृद्धानां उक्तिः भज्यते। अतः प्रकृते तिङः कर्तृवाचकत्वमङ्गीकर्तव्यमेव। तथैव च वैयाकरणानामस्माकं मते धात्वर्थव्यापरस्यैव प्राधान्यम्, तिङाञ्च कर्त्रादिवाचकत्वमिति अबाधितमेव॥

संदर्भ


1. वैयाकरणभूषणसारः।
2. मीमांसानयमञ्जरी।
3. वैयाकरणभूषसारतत्वदर्शिनी।
4. व्याकरणमहाभाष्यम्।